दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-208 | 1 | मई 21, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लपञ्चमी
ज्येष्ठ 07 प्रविष्टांशः मङ्गलमयः भवेत्

2 हिमेनाच्छादितं १३,०५० पादोन्नतं 'रोहताङ्ग- टॉप' प्राप्ताः पर्यटकाः, अन्तिम-सीमान्तं यावत् उद्घाटितः गिरिद्वारः

4 केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे समायोजिता सप्तदिवसीया राष्ट्रियकार्यशाला

5 नैयायिकशिरोमणेः उदयनाचार्यस्य ईश्वरसिद्धिः

## डी. आर. डी. ओ. द्वारा निर्देशित-प्रक्षेपास्त्रस्य सफल-परीक्षणम्



रक्षानुसंधान विकास संघटनेन डी. आर. डी. ओ. इत्यनेन देशस्य रक्षाक्षेत्राय एकं महत्वपूर्णोपलक्ष्यं साधितम्, यस्मिन् मानवरहितं वायुयानेन प्रक्षेपितं सटीक निर्देशित वी3 प्रक्षेपास्त्रस्य अंतिम विकास परीक्षणानां सफलतया सम्पादितम्। आन्ध्रप्रदेशे कुर्नूलस्य समीपे डी. आर. डी. ओ. परीक्षणपरिधिमध्ये परीक्षणं जातम्। रक्षामंत्री राजनाथसिंहः डी. आर. डी. ओ. संस्थायाः अभिनन्दनं कृत्वा, रक्षाक्षेत्रे स्वावलंबनार्थं प्राप्तं व्यूहात्मकं सोपानम् इति वर्णितवान्।

## सियोले रक्षामन्त्रिणः राजनाथसिंहस्य दक्षिणकोरिया-देशेन सह मिलनम्



रक्षामंत्री राजनाथसिंहः सियोल-नगरे दक्षिणकोरिया-देशस्य रक्षा अधिग्रहण कार्यक्रम-प्रशासनस्य मन्त्रिणा ली योङ्ग-चुल इत्यनेन सह मिलितवान्। एकस्मिन् सामाजिकान्तर्जालीये संदेशे, श्री सिङ्घः अवदत् यत् उपवेशने उभौ पक्षौ संयुक्त-विकासस्य, संयुक्त-उत्पादस्य, संयुक्त-निर्यातस्य च मार्गाणां निर्माणार्थं सहभागि प्रयासानां उपयोगाय सहमतिं प्रकटितवन्तौ। सः अग्रे अवदत् यत् द्वयोः देशयोः नवान्वेषणव्यवस्थायाः समन्वयार्थं महत्त्वाकांक्षी काइण्ड ऐक्स् उपक्रमस्य सम्भावनायाः उद्घाटनस्य मार्गचित्रस्य विषये अपि विचारः अभवत्।

## सर्वोच्चन्यायालयेन जाति-गणना-याचिका अस्वीकृता

सर्वोच्चन्यायालयेन आगामि जनगणनायां जातिगणनां कर्तुं केन्द्रस्य निर्णयस्य विरोधे याचिका अस्वीकृतम्, उक्तं च यत् अयं विषयः सर्वकारस्य नीतिक्षेत्रस्य अन्तर्गतम् आयाति। मुख्यन्यायाधीशस्य सूर्यकान्तस्य नेतृत्वे पीठेन उक्तं यत्, सर्वकारेण तेषां कृते कल्याणकारी-उपायान् कल्पयितुं, अनुन्नतवर्गेण सम्बद्धानां जनानां सङ्ख्या अवश्यमेव ज्ञातव्या। न्यायपीठेन उक्तं यत् एतादृशं दत्तांश-सङ्ग्रहणे किमपि अनुचितं नास्ति तथा च विषयेस्मिन् हस्तक्षेपं कर्तुं निराकृतम्।

## प्रधानमन्त्री नरेन्द्रमोदी रोम्-नगरे इटली-देशस्य प्रधानमन्त्रिणा जार्जिया मेलोनी इत्यनया सह प्रतिनिधिस्तरीय-वार्ताम् अकरोत्



प्रधानमन्त्री नरेन्द्रमोदी रोम्-नगरे इटली-देशस्य प्रधानमन्त्रिणा जार्जिया मेलोनी इत्यनया सह प्रतिनिधिस्तरीय-वार्ताम् अकरोत्, यस्य उद्देश्यं प्रमुखक्षेत्रेषु भारत-इटली-देशयोः द्वैपाक्षिक-सम्बन्धान् इतोप्यधिकं सुदृढं कर्तुं आसीत्। व्यापारस्य, निवेशस्य, तन्त्रज्ञानस्य, रक्षायाः, स्वच्छ ऊर्जायाः, सामरिकसहभागित्वस्य च क्षेत्रेषु सहकारस्य सम्वर्धनम् एव अस्य सम्मेलनस्य केन्द्रबिन्दुः आसीत्।उभौ नेतारौ परस्परहितस्य क्षेत्रीयस्य वैश्विकस्य च विकासेषु अपि चर्चितवन्तौ। भारत-इटली-देशयोः मध्ये चर्चायां प्रतिबिम्बितम् यत् वर्धमानं सामरिकसहभागित्वं, आर्थिकसहयोगस्य विस्ताराय, जनानां सम्बन्धेषु च महत्त्वं प्रदत्तम्। प्रतिनिधि-स्तरीया वार्तायाः अनन्तरं उभौ नेतारौ संयुक्तं वक्तव्यं प्रदत्तवन्तौ।प्रधानमन्त्रिणा मोदिना घोषितं यत् भारत-इटली-देशयोः द्वैपाक्षिक-सम्बन्धं विशेष-सामरिक सहभागित्वेन वर्धयितुं निर्णयः कृतः।श्रीमोदी अवदत् यत् उभौ पक्षौ सहकारं वर्धयितुं विस्तृतं चर्चा कृतवन्तौ, भारत-इटली नवान्वेषणकेन्द्रस्य स्थापनार्थं च कार्यं कुर्वन्तौ स्तः। सः अवदत् यत् भारत-इटली-रक्षा-औद्योगिक-मार्गचित्रं सैन्य-उपकरणानां सह-विकासस्य सह-उत्पादनस्य च मार्गम् प्रशस्तम्। प्रधानमंत्री अवदत् यत् उभौ देशौ नौवहनक्षेत्रेषु, पत्तनानाम् आधुनिकीकरणे, रसदक्षेत्रे, नील-अर्थव्यवस्थायां च मिलित्वा कार्यं करिष्यतः। इटली-देशस्य प्रधानमन्त्री जार्जिया मेलोनी इत्येषा अवदत् यत् भारत-इटली-देशयोः सम्बन्धः विशेष-सामरिक-सहभागित्वरूपेण वर्धमानः अस्ति, अपि च द्वैपाक्षिक-सम्बन्धाः अधुना स्वस्य पूर्णक्षमतां साधयितुं समर्थाः सन्ति।

### प्रधानमन्त्रिणोः संयुक्तलेखः

गतकेषुचित् वर्षेषु भारत-इटली-देशयोः मध्ये सम्बन्धाः अभूतपूर्वगत्या विस्तारिताः सन्ति, अधुना च निर्णायकं स्तरम् अवाप्नोत् । प्रधानमन्त्री नरेन्द्रमोदी तथा तस्य इटलीदेशीया समकक्षीया जार्जिया मेलोनी इत्युभाभ्यां लिखिते संयुक्तलेखे, उभयोः देशयोः मध्ये सम्बन्धः सौहार्दपूर्णस्नेहात् विशेष-सामरिक-सहभागित्वेन विकसितः अस्ति, यस्याधारः स्वातन्त्र्यस्य, लोकतन्त्रस्य, भविष्यस्य कृते संयुक्तदृष्ट्याधारित मूल्येषु च निहितास्तीति उभौ नेतारौ प्रकाशितवन्तौ। नेतारौ उक्तवन्तौ यत् यदा वैश्विकव्यवस्थायां गहनपरिवर्तनं प्रचलति, तदा भारत-इटली-सहभागित्वम् उच्चतम-राजनैतिक-संस्थागतस्तरेषु नियमित-आदानप्रदानद्वारा दर्शितम् अस्ति। एकविंश्यां शताब्द्यां समृद्धिः सुरक्षां च राष्ट्राणाम् नूतनाशयस्य, ऊर्जा-परिवर्तनस्य प्रबन्धनस्य, सामरिक सार्वभौमत्वस्य सुदृढीकरणस्य च क्षमतायाः उपरि परस्परसमन्वयं प्रतिबिम्बयति इति उभौ उक्तवन्तौ ।

## नितिन् गड्करी वर्येण हिन्दी-समितेः अध्यक्षता कृता



केन्द्रीय-मार्ग-परिवहन-राजमार्ग-मन्त्रिणा नितिन् गड्करी वर्येण नवदिल्ल्यां मन्त्रालयस्य हिन्दी-परामर्श समितेः सभायाः अध्यक्षता कृता। सामाजिकान्तर्जालीये पटले लिखिते लेखे श्री. गड्कड्करी वर्यः अवदत् यत् हिन्दी केवलं भाषा न अस्ति सा तु राष्ट्रस्य एकीकरणस्य प्रबलमाध्यमरूपेण कार्यं करोति। केन्द्रीयमन्त्रिणा उक्तं यत् मन्त्रालयस्य अधिकतमं कार्यं हिन्दीभाषायां एव भवेत् इति सुनिश्चितं कर्तुं तस्य प्रयासः अस्ति।

## सुभाषितम्

**गौरवं प्राप्यते दानात्,**
**न च वित्तस्य सञ्चयात्।**
**स्थितिरुच्चैः पयोदानां,**
**पयोधीनाम् अधः स्थितिः॥**

धन संपत्ति का दान करने से ही समाज में सम्मान और प्रशंसा प्राप्त होती है न कि उसको मात्र सञ्चय करने से। ऐसे दाताओं की समाज में उच्च स्थिति उसी प्रकार होती है जिस प्रकार वर्षा जल से भरपूर बादल आकाश में ऊंचाई पर स्थित होते हैं और खारे जल से भरे हुए सागर पृथ्वी पर नीचे स्थित होते हैं।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्ख्या-१७७१११
सङ्केत- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## उत्तरभारते उष्णतरङ्गः
### केषुचित् प्रदेशेषु प्रचण्डवृष्टिः

भारत-ऋतु-विभागेन अस्मिन् सप्ताहे उत्तरपश्चिम-भारते तथा मध्यभारते तीव्रतर-उष्णतरङ्गस्य स्थितेः संभावना प्रकटिता अस्ति। आई एम डी इत्यस्य अनुसारम् आगामिषु चतुर्षु दिनेषु दिल्ली-पञ्जाब्-हरियाणा-चण्डीगढ-ओडिशा-छत्तीसगढ-राजस्थान-तेलङ्गाना-उत्तराखण्ड्-इत्येतेषु प्रदेशेषु उष्णतरङ्गस्य स्थितिः भवितुम् अर्हति। अत्रान्तरे, असम्-मेघालय-केरलम्-माहे-उपहिमालयीय-पश्चिमबङ्गाल-सिक्किम्-तमिलनाडु-पुदुचेरी-करैक्कल्-अण्डमान्-निकोबार्-द्वीप समुहेषु च अद्य यावत् प्रचण्डवृष्टेः अपेक्षास्ति।

# हिमेनाच्छादितं १३,०५० पादोन्नतं 'रोहताङ्ग- टॉप' प्राप्ताः पर्यटकाः, अन्तिम- सीमान्तं यावत् उद्घाटितः गिरिद्वारः

हिमसंस्कृतवार्ताः- कुल्लूः। देशी-विदेशी-पर्यटकाणां प्रथमा रुचिः 'रोहताङ्ग- गिरिद्वारम्' (रोहताङ्ग-दर्रा) अन्तिम-सीमान्तं यावत् उद्घाटितम् अस्ति। मनाली-कोकसर-क्षेत्रयोः पक्षतः हिम- निवारण- कार्ये संलग्नानि यन्त्राणि परस्परं मिलितानि। सीमा-मार्ग-सङ्घटनस्य (BRO) दलं पञ्चतः विंशति-पाद-पर्यन्तम् (५-२० फीट) उन्नताः हिम-भित्तीः विदार्य 'रोहताङ्ग-टॉप' प्राप्तवत्। अधुना पर्यटकाः रोहताङ्ग-मार्गेण 'अटल- टनलतः प्रत्यागमिष्यन्ति। रोहताङ्ग- गिरिद्वारस्य उद्घाटनेन सहैव तत्र पर्यटकाणां सम्मर्दः (मेला) सञ्जातः। प्रतिदिनं १२०० वाहनानि अनुमतिपत्रं प्राप्य रोहताङ्ग-गिरिद्वारं गच्छन्ति। अधुना यावत् पर्यटक-वाहनानि 'मढ़ी' स्थानात् अग्रे 'राहनीनाला' पर्यन्तमेव प्रेष्यन्ते स्म। पर्यटकाः रोहताङ्गतः प्रायः चतुष्किलोमीटर-पूर्वं यावत् प्राप्नुवन्ति स्म। अधुना मार्गस्य पूर्णरूपेण उद्घाटनेन रोहताङ्गक्षेत्रे यान-निरोध-समस्यायाः मुक्तिः मिलिष्यति।
यद्यपि प्रशासनेन अधुना यावत् रोहताङ्ग- मार्ग-पुनर्स्थापनस्य (यातायात-प्रारम्भस्य) आधिकारिकी अधिसूचना न निर्गता, तथापि पर्यटकाः महत्या सङ्ख्यया रोहताङ्गं यावत् प्राप्नुवन्तः सन्ति। प्रतिदिनं अनुमति-पत्रग्रहणाय निर्मितस्य पर्यटन- विभागस्य अन्तर्जालपुटस्य 'स्लॉट' पूर्णतः आरक्षितं भवति। आधिकारिकरूपेण रोहताङ्ग-उद्घाटनान्तरं पर्यटकाणां सङ्ख्यायाम् अधिका वृद्धिः अङ्किता भविष्यति। सीमा-मार्ग-सङ्घटनस्य अधिकारिणः कथयन्ति यत् रोहताङ्ग-गिरिद्वारे अद्यापि वाहन-स्थानक-क्षेत्रात् हिम-निवारणस्य कार्यम् अवशिष्टं वर्तते। तदनन्तरं प्रशासनेन सह मार्गस्य निरीक्षणं कृत्वा यातायात- सम्बद्धा अधिसूचना निर्गमिष्यति। एसडीएम गुञ्जीतसिंह चीमा अवदत् यत् शीघ्रमेव रोहताङ्गस्य निरीक्षणं कृत्वा प्रतिवेदनम् उपायुक्ताय प्रेषयिष्यते। समुद्रतलात् १३,०५० पाद- उन्नतौ स्थितस्य रोहताङ्ग- गिरिद्वारस्य उद्घाटनस्य प्रतीक्षा पर्यटकैः सह पर्यटन-व्यवसायिभिरपि सोत्कण्ठं क्रियते।

# राज्यपालः गुजरेहड़ा-विद्यालयस्य भ्रमणं कृतवान्, छात्रैः सार्द्धं च सम्भाषणं विहितवान्



हिमसंस्कृतवार्ताः- काङ्गड़ा। राज्यपालः कविन्द्रगुप्तः काङ्गड़ा-जनपदस्य राजकीय-प्राथमिक- विद्यालय- गुजरेहड़ा इत्यस्य भ्रमणं कृतवान्। तेन राज्यस्य ग्रामीणक्षेत्रेषु शिक्षायाः वास्तविकस्थितेः मूल्याङ्कनाय छात्रैः, शिक्षकैः, शिक्षाविभागस्य अधिकारिभिः च सह संवादः विहितः। अस्मिन् अवसरे राज्यपालः विद्यालयस्य शैक्षणिक-वातावरणस्य, मूलभूत-सुविधानां तथा सुदूर-क्षेत्राणां विद्यालयानां छात्राणां च सम्मुखम् आगच्छताम् आह्वानानां विषये सूचनां प्राप्तवान्। छात्रैः सह आत्मीयतापूर्वकं भाषमाणः सः तान् समर्पणेन आत्मविश्वासेन च सह शिक्षा- ग्रहणाय प्रेरितवान्।
अस्मिन् अवसरे राज्यपालः अवदत् यत् बालकाः राष्ट्रस्य भविष्यं सन्ति। तेषां भविष्यम् उज्ज्वलं कर्तुं राज्यस्य दुर्गमेषु ग्रामीणेषु च विद्यालयेषु शैक्षणिक- आधारभूत- संरचनाम् अधिकं सुदृढीकर्तुम् अत्यन्तम् आवश्यकं वर्तते। भौगोलिक- परिस्थितिभिः उत्पन्नानाम् आह्वानानां समाधानं कृत्वा प्रत्येकस्मै बालकाय गुणात्मिकां शिक्षां प्रदातुं सर्वोपरि प्राथमिकता भवितव्या। तेन उत्तमानां कक्षाप्रकोष्ठानां, स्वच्छता-सुविधानां, डिजिटल- शिक्षण-संसाधनानां तथा सर्वकारीय- ग्रामीण-विद्यालयेषु अनुकूल- शैक्षणिक- वातावरणस्य आवश्यकतायाम् अपि बलं दत्तम्।
राज्यपालः प्रसन्नतां प्रकटयन् अकथयत् यत् हिमाचलप्रदेशः राष्ट्रियस्तरे गुणात्मक-शिक्षायाः क्षेत्रे उल्लेखनीयां प्रगतिं प्राप्तवान् अस्ति। शिक्षा- मन्त्रालयेन निर्गतायाः 'परफॉर्मेंस ग्रेडिंग इंडेक्स' (PGI 2.0) तथा 'पीजीआई-डी' (PGI-D) २०२४- २५ प्रतिवेदनस्य उल्लेखं कुर्वता तेन उक्तं यत् हिमाचलप्रदेशः शिक्षाक्षेत्रे उत्कृष्टतां प्राप्नोति, प्रदेशेन च गुणात्मक-शिक्षाक्षेत्रे देशे षष्ठं स्थानं तथा राज्यानां श्रेण्यां तृतीयं स्थानं लब्धम्।राज्यपालः अधिकारिभिः सह उपलब्ध-संसाधनानां मानवबलस्य च सर्वोत्तम-उपयोगाय विद्यालयानां रणनीतिकसमूहस्य अवधारणायाः उपरि अपि चर्चां कृतवान्। तेन प्रतिपादितं यत् एतादृशाः उपायाः शिक्षायाः गुणात्मकतायाः वर्धने, छात्रेभ्यः उत्तम- शैक्षणिक-अवसरप्रदाने तथा अस्मिन् क्षेत्रे प्रशासनिक- दक्षतायाः वृद्धौ सहायकाः सिद्धाः भवन्ति।
तेन उक्तं यत् प्रगतिशील-समाजस्य निर्माणे शिक्षा महत्त्वपूर्णां भूमिकां निर्वहति। तेन शिक्षकैः सह युनः उज्ज्वल-भविष्य-निर्माणाय समर्पणेन निष्ठया च कार्यं कर्तुम् आह्वानं कृतम्। तेन कठिनेषु दुर्गमेषु च क्षेत्रेषु सेवां ददताम् शिक्षकाणां प्रयासाः अपि श्लाघिताः। अस्मिन् अवसरे शिक्षाविभागस्य जनपद-प्रशासनस्य च वरिष्ठाः अधिकारिणः अपि उपस्थिताः आसन्।

# इंडियन नेशनल कॉंग्रेस दलं गुणात्मकशिक्षायाः उन्नयनार्थं कार्यं कुर्वति, यदा तु भारतीय जनता पार्टी केवलं संस्थानानां उद्घाटने एव बलं दत्तवती- मुख्यमन्त्री सुखविंदर सिंह सुक्खुः




हिमसंस्कृतवार्ताः- शिमला।मुख्यमन्त्रिणा सुखविन्द्रसिंहसुक्खुना विद्यालयीशिक्षाक्षेत्रे राष्ट्रियस्तरे शिक्षामन्त्रालयेन प्रकाशितायां परफॉर्मेन्स-ग्रेडिङ्ग-इण्डेक्स 2.0 प्रतिवेदने विद्यार्थिभ्यः गुणात्मकशिक्षां प्रदातुं प्रदेशस्य देशे षष्ठं स्थानं प्राप्तम् इति विषये अभिनन्दनं प्रदत्तम्। अस्याः प्रतिवेदनस्य अनुसारं हिमाचलप्रदेशः सप्ताङ्कानां वृद्धिं कृत्वा त्रयोदशस्थानात् षष्ठस्थानं प्राप्तवान्, राज्यवर्गीकरणे च तृतीयस्थानं प्राप्तम्। सुक्खुना उक्तं यत् एषा उपलब्धिः वर्तमानकाङ्ग्रेससर्वकारेण शिक्षाक्षेत्रे कृतानां विविधसुधारकार्याणां, गुणात्मकशिक्षायाः, शिक्षकप्रशिक्षणस्य विद्यालयेषु सुविधाविस्तारस्य परिणामः अस्ति।
पूर्वभाजपासर्वकारस्य ध्यानं केवलं वित्तविहीनानां, कर्मचारीविहीनानां विद्यालयानाम् उद्घाटने एव आसीत्, किन्तु वर्तमानकाङ्ग्रेससर्वकारः गुणात्मकशिक्षायां विशेषं ध्यानं ददाति, येन ग्रामेषु अध्ययनं कुर्वन्तः छात्राः अपि उत्तमशिक्षां प्राप्तुं शक्नुवन्ति। पूर्वभाजपासर्वकारेण शिक्षाक्षेत्रस्य उपेक्षा कृता, येन प्रदेशे शिक्षास्तरस्य पतनम् अभवत्।
मुख्यमन्त्री उक्तवान् यत् वर्तमानकाङ्ग्रेससर्वकारः सत्तां प्राप्तमात्रेण विद्यार्थिभ्यः गुणात्मकशिक्षां प्रदातुं शिक्षाक्षेत्रे अनेकानि सुधारात्मकपदानि स्वीकृतवान्। सर्वकारः प्राथमिकतया शिक्षकपदानि पूरयति, येन शिक्षकाभावकारणात् विद्यार्थिनां अध्ययनं न प्रभावितं भवेत्। १५६ विद्यालयाः सेंट्रल बोर्ड आफ़ सेकेंडरी एजुकेशन (सीबीएसई) पद्धत्या सम्बद्धाः क्रियमाणाः सन्ति।

# जयराम ठाकुरः अवदत्- व्यवस्था- परिवर्तनस्य नाम्ना अद्यापि विकासकार्ये कपाटं स्थापयति सुक्खु-सर्वकारः

हिमसंस्कृतवार्ताः- मण्डी।पूर्वमुख्यमन्त्री तथा च विपक्षनेता जयरामठाकुरः सराज- विधानसभाक्षेत्रान्तर्गतस्य जिलापरिषद- मार्ग-वार्डस्य शिल्हीबागी, शिवाखड्ड, बागाचनोगी, भाटकीधार इत्यादिषु स्थानेषु एकां नुक्कड़- जनसभां सम्बोधयन् प्रदेशस्य वर्तमान-काङ्ग्रेस- सर्वकारस्य उपरि तीक्ष्णप्रहारं कृतवान्। जयरामठाकुरः अवदत् यत् सार्ध-त्रिचतुर-वर्षाणां कार्यकालस्य पूर्णतानन्तरमपि 'व्यवस्था- परिवर्तनस्य' रिक्तं घोषं ददानः सुक्खु-सर्वकारः जनहिताय नूतनसंस्थानां उद्घाटनस्य स्थाने पूर्वतन- भाजपा- सर्वकारेण आरब्धानां संस्थानानां पिधानं कर्तुं दृढसङ्कल्पः अस्ति, येन सम्पूर्णे प्रदेशे विकासकार्याणि अवरुद्धानि अभवन्।

## आपदाप्रबन्धने सर्वकारस्य विफलता

तेन आपदाप्रबन्धनस्य क्षेत्रे सर्वकारः पूर्णरूपेण विफलः घोषितः। सः अवदत् यत् प्रदेशे पुनः वर्षाकालः आगच्छन् अस्ति, परन्तु सर्वकारः गतवर्षस्य आपदायाः समये मार्गेषु पतितम् अवकरम् अपि दूरीकर्तुं न शक्नोत्। ग्रामीणमार्गाणाम् दुर्दशाः ग्रामीणमार्गेषु चलन्त्यः बस-यानानि अद्यापि स्थगिताः सन्ति। जनसामान्यानां कष्टम्: मार्गाणां जीर्णावस्थायाः कारणात् ग्रामीणाः भारवस्तूनि स्वपृष्ठे वोढुं विवशाः अभवन्।
**राजनैतिकस्थितिः**-एतैः परिणामैः काङ्ग्रेस-दलस्य अन्तः मुख्यमन्त्रिणः विरोधी-गुटे च महती अशान्तिः उत्पन्ना अस्ति। एतां स्थितिं गोपयितुं मुख्यमन्त्री आगामि- पञ्चायत- निर्वाचनं दृष्ट्वा मिथ्या-दावान् उपस्थाप्य जनतां भ्रामयति, तथा च काङ्ग्रेस-हाइकमानं (उच्चाधिकारिणः) सन्तुष्टं कर्तुं माध्यमेषु (मीडिया) प्रतिदिनं असत्यान् अङ्कान् प्रस्तौति।

# केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे समायोजिता सप्तदिवसीया राष्ट्रियकार्यशाला




**हिमसंस्कृतवार्ताः- जयपुरम्।** भारतीय- दार्शनिक- अनुसन्धान- परिषदः (ICPR), नवदेहली इत्यस्य आर्थिकसौजन्येन केन्द्रीय- संस्कृत- विश्वविद्यालयस्य जयपुरपरिसरस्थितया भारतीय- पाश्चात्यदर्शनशास्त्र- विद्याशाखया दिनाङ्के 14 मई 2026 तः 20 मई 2026 पर्यन्तम् सप्तदिवसीया राष्ट्रियकार्यशाला समायोजिता, यस्याः गतदिने भव्यतया समापनम् अभवत्। कार्यशालायाः विषयः आसीत्-

***"Philosophical Insights of the Nyāya-Vaiśeṣika Philosophy: A Textual and Interpretative Study of Vaiśeṣika Padārthavyavasthā kā Paddhatimūlaka Vimarśa"***

"न्याय–वैशेषिकदर्शनस्य दार्शनिकपरिदृश्याः- 'वैशेषिकपदार्थव्यवस्था' इत्यस्य पद्धतिमूलकविमर्शस्य पाठात्मकव्याख्यात्मकञ्च अध्ययनम्"।समापनसत्रस्य आयोजनं संवादशालायां, नूतनभवने, केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे अभवत्। कार्यक्रमस्य सञ्चालनं डॉ. राजेश अधिकारी महोदयेन, सहायकाचार्येण, दर्शनविद्याशाखायाः कृतम्। कार्यक्रमस्य शुभारम्भः मङ्गलाचरणेन अभवत्, यत् डॉ. सुधाकर पाण्डेय महोदयेन, प्राध्यापकेन, वेदविद्याशाखायाः प्रस्तुतम्। ततः समवेतस्वरेण "वन्दे मातरम्", कुलगीतम् "ज्ञानप्रभाम्" तथा विद्याशाखागीतस्य गायनम् अभवत्।कार्यशालायाः समन्वयकः डॉ. सच्चिदानन्द-स्नेही महोदयः, सहाचार्यः तथा भारतीय- पाश्चात्यदर्शनशास्त्र- विद्याशाखायाः समन्वयकः, कार्यशालायाः विस्तृतं प्रतिवेदनं प्रस्तुतवान्। तेन उक्तं यत् सप्तदिनात्मकस्मिन् राष्ट्रियकार्यक्रमे देशस्य विभिन्नराज्येभ्यः आगताः 48 प्रतिभागिनः सक्रियतया सहभागितां कृतवन्तः। कार्यशालायां न्याय– वैशेषिकदर्शनस्य दार्शनिक- तात्त्विक- तथा पद्धतिमूलकपरम्परासु विशेषज्ञविद्वद्भिः गम्भीरव्याख्यानानि, पाठचर्चाः, संवादसत्राणि च आयोजितानि। कार्यशालायाः अन्तर्गतं 35 शोधपत्राणां प्रस्तुतीकरणम् अभवत्, यत्र विभिन्नविश्वविद्यालयानां संस्थानानां च शोधार्थिनः विद्वांसश्च स्वकीयशोधनिष्कर्षान् प्रस्तुतवन्तः।मुख्यातिथिः प्रो. पूजाव्यास महोदया, डायरेक्टर, भारतीयदार्शनिकअनुसन्धानपरिषदः, नवदेहली, स्वीयसम्बोधने भारतीयदर्शनस्य तार्किक- वैज्ञानिक- परम्परायाः विषये प्रकाशं दत्त्वा उक्तवती यत् न्याय–वैशेषिकदर्शनं भारतीय- ज्ञान- परम्परायाः विश्लेषणात्मकचेतनायाः उत्कृष्टम् उदाहरणम् अस्ति। तया उक्तं यत् भारतीयदार्शनिकपरम्पराः वर्तमान- वैश्विक- बौद्धिक- विमर्शेष्वपि अत्यन्तं प्रासङ्गिकाः सन्ति तथा युवावर्गः भारतीयज्ञानपरम्परायाः मूलग्रन्थानां अध्ययन-अनुसन्धानयोः प्रति प्रेरितः भवेत्।विशिष्टातिथिः प्रो. सत्यमकुमारी महोदया, निदेशिका, वेदव्यासपरिसरः, हिमाचलप्रदेशः, स्वीयसम्बोधने उक्तवती यत् भारतीयदर्शनं केवलम् आध्यात्मिकचेतनायाः आधारः नास्ति, अपितु वैज्ञानिकतार्किकदृष्टिकोणस्य विकासेऽपि महत्त्वपूर्णं योगदानं ददाति। तया विश्वविद्यालयेन आयोजितानाम् एतादृशानां राष्ट्रिय- प्रशिक्षण- कार्यक्रमाणां प्रशंसा कृता तथा उक्तं यत् एतेन भारतीयज्ञानपरम्परायाः संरक्षणसंवर्धनयोः नूतना दिशा प्राप्यते।
कार्यक्रमे प्रतिभागिभिः अनुभवकथनानि प्रस्तुतानि, यत्र कार्यशाला अत्यन्तम् उपयोगिनी, ज्ञानवर्धिनी, प्रेरणादायिनी चेति कथितम्। प्रतिभागिभिः उक्तं यत् अस्याः कार्यशालायाः माध्यमेन न्याय–वैशेषिकदर्शनस्य मूलावधारणानां गम्भीरबोधस्य अवसरः प्राप्तः।
ततः अनन्तरम् अतिथिभिः प्रतिभागिभ्यः प्रमाणपत्राणि वितरितानि। समापनसत्रस्य अध्यक्षतां कुर्वन् प्रो. लोकमान्य-मिश्र महोदयः, निदेशकः, केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरस्य, उक्तवान् यत् भारतीयदर्शनपरम्परा विश्वमानवतायै मार्गदर्शिका अस्ति तथा विश्वविद्यालयः भविष्येऽपि भारतीय- ज्ञान- परम्पराधारितानां शोध- प्रशिक्षण- कार्यक्रमाणाम् आयोजनं निरन्तरं करिष्यति।
अन्ते डॉ. रानी दाधीच महोदया, सहायकाचार्या, भारतीय- पाश्चात्यदर्शनशास्त्र- विद्याशाखायाः धन्यवादज्ञापनं प्रस्तुतवती। राष्ट्रगानेन सह कार्यक्रमस्य समापनम् अभवत्।अस्मिन् अवसरे विश्वविद्यालयस्य आचार्याः, शोधार्थिनः, विद्यार्थिनः तथा देशस्य विभिन्नराज्येभ्यः आगताः प्रतिभागिनः बहुसंख्यया उपस्थिताः आसन्।

## श्रीश्रीरविशङ्कर- महोदयेन सह मिलितः मुख्यमन्त्री सुक्खुः, प्राकृतिक- कृषिविषये निराश्रित- गोवंश- रक्षण- विषये च संजाता चर्चा

**हिमसंस्कृतवार्ताः- बैंगलुरूः।** मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना अद्य बेङ्गलूरुनगरे आध्यात्मिकगुरुणा, 'आर्ट ऑफ लिविंग' संस्थायाः संस्थापकेन च श्रीश्रीरविशङ्कर- महोदयेन सह सम्मिल्य तस्य आशीर्वादः सम्प्राप्तः। तेन आश्रमे कार्यरतान् हिमाचलप्रदेशस्य जनान् मिलित्वा तेषां कुशलक्षेमं पृष्टं तथा आश्रमे गोसेवा अपि कृता। श्रीश्रीरविशङ्कर-महोदयेन सह जाते अस्मिन् सम्भाषणे मुख्यमन्त्रिणा हिमाचलप्रदेशे प्राकृतिककृषेः तथा निराश्रित-गोवंशस्य संरक्षणार्थं स्वीक्रियमाणानां पदक्षेपाणां सविस्तरेण चर्चा कृता। तेन प्रतिपादितं यत् प्रदेशसर्वकारेण राज्ये कृषकाः प्राकृतिककृषिं स्वीकर्तुं प्रेरयन्ते, प्राकृतिक- कृषिणा उत्पादितेषु शस्येषु च सर्वकारः न्यूनतम- समर्थनमूल्यं ददाति। अनेन उपभोक्तृभ्यः विपण्यां रसायनमुक्त- उत्पादाः सुलभतया उपलभ्यन्ते, कृषकेभ्यः च स्वकीयोत्पादस्य उत्तमं मूल्यं प्राप्यते।
मुख्यमन्त्रिणा सुक्खुमहोदयेन उक्तं यत् प्रदेशसर्वकारेण 'गोपाल योजनायाः' अन्तर्गतं निजी- गौसदनेषु आश्रितानां गोवंशानां कृते दीयमाना अनुदानराशिः प्रतिगोवंशं ७०० रूप्यकेभ्यः प्रतिमासं वर्धयित्वा १२०० रूप्यकाणि कृता अस्ति। २०२६-२७ वर्षस्य आयव्ययके (बजट) निराश्रित-गोवंशस्य पुनर्वासार्थं बहवः नूतनाः प्रावधानाः विहिताः सन्ति। तेन निगदितं यत् गतेषु वर्षेषु राज्यसर्वकारेण बहूनि गो-अभयारण्यानि विशाल-गौसदनानि च स्थापितानि। प्रतिष्ठिताः स्वयंसेवीसंस्थाः, सार्वजनिक- सङ्घटनानि इच्छुकाः उद्योगसमूहाः च कस्मिन्नपि राजकीय- गौसदने गो-अभयारण्ये वा गोवंशं दत्तकग्रहीतुम् अनुमतिं लप्स्यन्ते। श्रीश्रीरविशङ्कर- महोदयेन प्रदेशसर्वकारस्य प्राकृतिक-कृषिक्षेत्रे, गो-संरक्षण-संवर्धन-क्षेत्रे च विहिताः प्रयासाः भृशं श्लाघिताः।



# सङ्ग्रहालयपरम्परा पौराणिकपरम्पराऽस्ति, संस्कृतेः सरंक्षणं सम्वर्धनञ्च च कुर्वन्ति सङ्ग्रहालयाः- डॉ. आर. सी. ठाकुरः



**हिमसंस्कृतवार्ता- डॉ. विजयकुमारः**
महर्षिपाणिनि- संस्कृत- वैदिक- विश्वविद्यालयस्य वास्तुविभागेन अन्तर्राष्ट्रीय- सङ्ग्रहालयदिवसस्य उपलक्ष्ये कार्यक्रमस्य आयोजनं कृतम्। कार्यक्रमान्तर्गतं प्राचीनवास्तुसामग्री- सङ्कलनाभियानस्य शुभारम्भः माननीयकुलगुरुणा प्रो. शिवशङ्करमिश्रमहोदयेन कृतः।
अस्य अभियानस्य प्रमुखोद्देश्यः ग्राम्यप्रदेशेषु प्राप्यमाणानां शतवर्षाधिकप्राचीनवस्तूनां सङ्ग्रहणं संरक्षणञ्चाऽस्ति। अस्मिन् अभियाने प्राचीनपात्राणि, उपकरणानि, कृष्युपकरणानि तथा च अन्याः ऐतिहासिकप्रयोजनयुक्तसामग्रयाः सङ्ग्रहणं संरक्षणञ्चाऽस्ति। कार्यक्रमे अश्विनीशोधसंस्थानस्य निदेशकः डॉ. आर. सी. ठाकुरमहोदयः मुख्यवक्तारूपेण उपस्थितः आसीत्। तेन विश्वविद्यालये सञ्चाल्यमानस्य वराहमिहिर- वास्तु- एवं पुरातत्त्व- सङ्ग्रहालय इत्यस्य संरक्षणसंवर्धनविषये मार्गदर्शनं प्रदत्तम्। तेन उक्तं यत् भारते सङ्ग्रहपरम्परा प्राचीनकालादारभ्य रामायण- महाभारतकालतः च प्रचलिता आसीत्। उदाहरणरूपेण तेन जनकराजस्य समीपे स्थितस्य शिवधनुषस्योल्लेखः कृतः, यत् अपि एकः ऐतिहासिकसङ्ग्रहः आसीत्।
डॉ. ठाकुरमहाभागेन मुद्राभिः राजवंशपरम्पराणां शासनकालीनघटनानाञ्च विषये विस्तरेण प्रकाशः अपि क्षिप्तः। तेन उक्तं यत् तस्य सङ्ग्रहालये अनेकाः दुर्लभवस्तूनि सुरक्षिताः सन्ति। उल्लेखनीयं यत् पुरातत्त्वक्षेत्रे तस्य विशिष्टयोगदानाय मध्यप्रदेशस्य माननीय- मुख्यमन्त्रिणा डॉ. मोहनयादवमहोदयेन “कर्मयोद्धा” इति सम्बोधनेन सम्बोधितः।
कार्यक्रमस्य अध्यक्षतां कुर्वन् माननीयः कुलगुरुः प्रो. शिवशङ्करमिश्रः अवदत् यत् भारतीय- ज्ञान- परम्परायां सङ्ग्रहालयानां विशेषमहत्त्वम् अस्ति तथा च वराहमिहिर- वास्तु एवं पुरातत्त्व- सङ्ग्रहालयः भारतीयसंस्कृतेः, ग्राम्यपरम्परायाः, तत्कालीनविज्ञानस्य यन्त्रप्रणाल्याश्च संरक्षणसंवर्धनयोः प्रमुखमाध्यमं भविष्यति। तेन प्राचीन- वास्तुसामग्री- सङ्कलनाभियानवर्ष- २०२६ निमित्तं वास्तुविभागाय शुभकामनाः प्रदत्ताः।
**कार्यक्रमे कुलसचिवः प्रो. दिलीपसोनी, वेदविभागाध्यक्षः डॉ. संकल्पमिश्रः, प्राध्यापकगणाः, छात्राश्च उपस्थिताः आसन्। कार्यक्रमस्य प्रास्ताविकं स्वागतभाषणञ्च वास्तुविभागाध्यक्षेण डॉ. शुभमशर्म महोदयेन कृतम्। धन्यवादज्ञापनं व्याकरणविभागाध्यक्षेण डॉ. अखिलेशद्विवेदीमहोदयेन, सञ्चालनं च वास्तुविभागस्याचार्येण डॉ. विजयकुमारमहोदयेन विहितम्।**


# “भारत-नेपालयोः मैत्री पर्वत- नदी- सांस्कृतिक- परम्परा- पारस्परिक- सम्मान- समन्विता चिरस्थायिनी सम्बन्धपरम्परा अस्ति”- जिलाधिकारी







**हिमसंस्कृतवार्ताः- मधुबनी, २० मई २०२६।** भारत- नेपालयोः जिलास्तरीय- सीमासमन्वय- परिषदः समवायः सौराठस्थित- मिथिलाचित्रकला- संस्थानस्य सभागारे अत्यन्तसौहार्दपूर्णवातावरणे सम्पन्नः। अस्य समवायस्य संयुक्ताध्यक्षतां मधुबनी- जिलाधिकारी आनन्दशर्मा तथा सिरहा- जिलायाः प्रमुखजिलाधिकारी सुरेन्द्रपौडेल महोदयौ निर्वहितवन्तौ। उभयदेशीय- प्रतिनिधिमण्डलस्य सदस्याः अस्मिन् समवाये सहभागित्वम् अकुर्वन्। उभयराष्ट्रयोः राष्ट्रगीतेन सह समवायस्य शुभारम्भः सम्पन्नः।
समवाये उभयपक्षीयाधिकारिभिः विविधविषयेषु विस्तृतरूपेण द्विपक्षीयविमर्शः कृतः। विशेषतया नेपालदेशात् भारतदेशं प्रति कूटमुद्राणाम् आवागमननिरोधविषये गम्भीरचर्चा अभवत्। सीमाक्षेत्रेषु सुदृढसुरक्षाव्यवस्थाया आवश्यकता विषयेऽपि विशेषबलं प्रदत्तम्।उभयपक्षीयप्रतिनिधिभिः मानवतस्करीनिवारणम्, भारतीयसीमायां मद्यप्रवेशनियन्त्रणम्, बिहारराज्ये मद्यनिषेधव्यवस्थायाः प्रभावीकार्यान्वयनार्थं नेपालसीमावर्ती- जिलानां सहयोगः, सीमाक्षेत्रेष्वतिक्रमणनिवारणं, कूटमुद्रानियन्त्रणम्, अपराधिनां निग्रहः, असामाजिकतत्त्वैः मुक्तसीमायाः दुरुपयोगनिवारणम्, निषिद्धद्रव्य- दुरुपयोगप्रतिषेधः, समये सूचनानामादानप्रदानम्, उभयदेशीयपुलिसविभागयोः पारस्परिकसमन्वयः, सीमाप्रवेशबिन्दुषु विशेषसतर्कता, संयुक्तक्षेत्रसर्वेक्षणं, सीमास्तम्भानां पुनर्संस्कारः इत्यादिषु बहुषु महत्त्वपूर्णविषयेषु व्यापकविमर्शः कृतः।
जिलाधिकारी श्रीमान् आनन्दशर्मा नेपाली- प्रतिनिधिमण्डलस्य हार्दिकस्वागतं विधाय उक्तवान् यत् भारत-नेपालयोः सम्बन्धः पर्वतैः, नदीभिः, सांस्कृतिकपरम्पराभिः, पारस्परिकसम्मानेन च समन्वितः चिरस्थायी अस्ति। उभयदेशयोर्मध्ये “बेटी- रोटी” सम्बन्धरूपा सामाजिक- सांस्कृतिक- परम्परा अद्यापि सुदृढरूपेण प्रवहति। उभयदेशीयनागरिकाणां मध्ये प्रेम, सौहार्दं, विश्वासश्च निरन्तरं वर्धेत इति विषये वयं सततं प्रयतामहे। तेन उक्तं यत् उभयपक्षौ सर्वदा परस्परसंवादेन समस्यासमाधानमार्गम् अनुसृतवन्तौ स्तः। अतः पारस्परिकसामञ्जस्यं संस्थाप्य पूर्णसजगतया कार्यकरणम् अत्यावश्यकम्। एषः समवायः अत्यन्तमहत्त्वपूर्णः फलप्रदश्च भविष्यतीति तेन अभिहितम्। ततः परं सिरहा-जिलायाः प्रमुखजिलाधिकारी सुरेन्द्रपौडेल उक्तवान् यत् भारत- नेपाल- जिलास्तरीय- सीमासमन्वयपरिषदः अयं समवायः अत्यन्तमहत्त्वपूर्णः वर्तते। अद्यतनः समवायः सौहार्दपूर्णवातावरणे सम्पन्नः, यः भविष्ये अत्यन्तं परिणामकारी सिद्धः भविष्यति।पुलिस- अधीक्षकः योगेन्द्रकुमारः कूटमुद्रानियन्त्रणम्, मादकद्रव्यतस्करीनिवारणम्, उभयदेशीय-अपराधिनां विवरणविनिमयः इत्यादिषु विषयेषु स्वविचारान् प्रस्तुतवान्।अपराधिनां निग्रहः, मानवतस्करीनिवारणम्, सीमामध्यप्रदेशस्य अतिक्रमणप्रतिषेधः, मद्यव्यापारिणां विरुद्धं कठोरकार्यवाही, सूचनानामादानप्रदानम् इत्यादिषु विषयेषु उभयपक्षीयाधिकारिभिः स्वस्वमतानि प्रस्तुतानि तथा कतिपयविषयेषु पारस्परिकसहमतिरपि अभवत्।



डॉ. विमलेश झा, डीएवी पब्लिक स्कूल, बरारी, भागलपुर, बिहार

# नैयायिकशिरोमणेः

## उदयनाचार्यस्य ईश्वरसिद्धिः

भारतीयदर्शनपरम्परायां न्यायवैशेषिकदर्शनस्य विशिष्टं स्थानम् अस्ति। तत्र तर्कप्रमाणप्रधानतया सत्यस्य अन्वेषणं क्रियते। अस्यां परम्परायां महत्त्वपूर्णः दार्शनिकः आसीत्- उदयनाचार्यः। सः न केवलं न्यायशास्त्रस्य विकासे अपितु ईश्वरसिद्धेः तर्कसम्मतप्रतिपादनस्य कृते अपि प्रसिद्धः अस्ति। तेन विरचिते ग्रन्थे न्यायकुसुमाञ्जलि इत्यत्र ईश्वरस्य अस्तित्वं युक्तिपूर्वकं प्रतिपादितम्। अस्मिन् निबन्धे अस्माभिः उदयनाचार्यस्य जीवनं, तस्य दार्शनिकदृष्टिः, ईश्वरसिद्धेः प्रमुखाः तर्काः विस्तरेण विवेच्यन्ते। उदयनाचार्यः मिथिलाक्षेत्रे (वर्तमानबिहारप्रदेशे) जातः आसीत्। सः दशमशताब्द्यां प्रख्यातः न्यायदार्शनिकः आसीत्। तस्य प्रमुखाः ग्रन्थाः सन्ति- न्यायकुसुमाञ्जलिः, आत्मतत्त्वविवेकः, किरणावली, लक्षणावली इत्यादयः। विशेषतः न्यायकुसुमाञ्जलि ग्रन्थे सः ईश्वरस्य अस्तित्वं प्रतिपादयति। तस्मिन् काले बौद्ध, जैन, सांख्यादयः अनेके दर्शनप्रवाहाः ईश्वरस्य अस्तित्वं न स्वीकुर्वन्ति स्म। तेषां मतानां खण्डनार्थं तथा च वेदसम्मतं ईश्वरवादं स्थापयितुम् उदयनाचार्यः प्रबलतया प्रयत्नम् अकरोत्। भारतीयदर्शनशास्त्रे ईश्वरसिद्धिः केवलं धार्मिकविषयः न, किन्तु दार्शनिकप्रश्नः अपि अस्ति। जगतः कारणं किम्? सृष्टेः नियन्ता कः? कर्मफलवितरणं कथं भवति? इत्यादीनां प्रश्नानां समाधानं विना दर्शनं अपूर्णम् इति मन्यते। उदयनाचार्यः मन्यते यत् जगत् न स्वतः उत्पद्यते। अचेतनद्रव्याणि स्वयमेव क्रमबद्धसृष्टिं कर्तुं समर्थानि न सन्ति। अतः एकः सर्वज्ञः, सर्वशक्तिमान् ईश्वरः आवश्यकः भवति। उदयनाचार्यस्य ईश्वरसिद्धेः प्रमुखाः तर्काः उदयनाचार्यः ईश्वरस्य अस्तित्वं स्थापयितुं अष्टौ प्रमुखतर्कान् प्रतिपादितवान्। एते तर्काः न्यायशास्त्रीयरीत्या अत्यन्तं सूक्ष्माः सन्ति।

**१. कार्यात् (कार्यकारणन्यायः)** यत् कार्यम् अस्ति तस्य कारणं भवति। इदं जगत् कार्यरूपम् अस्ति। अतः अस्य कारणं भवितुम् अर्हति। घटः कुम्भकारेण निर्मीयते। एवं जगत् अपि कस्यचित् कर्तुः परिणामः विद्यते। सः कर्ता ईश्वरः अस्ति। जगतः कारणरूपेण ईश्वरः सिद्धः भवति।

**२. आयोजनात् (व्यवस्थायाः तर्कः)**

जगतः अचेतनद्रव्याणि स्वतः सुगठितरूपेण संयोजितानि न स्युः। तेषां संयोजनाय चेतननियन्ता आवश्यकः। परमाणवः स्वतः क्रमबद्धं विश्वं निर्मातुं न शक्नुवन्ति। यथा यन्त्रस्य निर्माणे अभियन्ता आवश्यकः, जगतः निर्माणे च ईश्वरः आवश्यकः।

**३. धृत्यादेः (धारणतर्कः)-** जगतः धारणं, स्थिति, नियमनं च कस्यचित् शक्तेः अपेक्षते। ग्रहाः स्वस्वमार्गे सञ्चरन्ति, ऋतवः नियतकाले आगच्छन्ति। एतत् सर्वं नियमनं सूचयति। एषा व्यवस्था ईश्वरस्य अस्तित्वं दर्शयति।

**४. पदात् (शब्दतर्कः)-** शब्दानाम् अर्थबोधः कस्यचित् नियन्तुः संकेतपरम्परया भवति। शब्दाः स्वयमेव अर्थं न बोधयन्ति। कश्चित् आदौ तेषां अर्थं निश्चितवान्। सः ईश्वरः अस्ति।

**५. प्रत्ययात् (विश्वासस्य तर्कः)-** वेदाः अपौरुषेयाः सन्ति। तेषु यः ज्ञानप्रत्ययः अस्ति, सः कस्यचित् सर्वज्ञस्य स्रोतः भवितुम् अर्हति। वेदेषु यथार्थज्ञानं दृश्यते। एतत् केवलं सर्वज्ञेन एव सम्भवति। अतः ईश्वरः अस्ति।

**६. श्रुतेः (वेदप्रमाणम्)** वेदाः ईश्वरस्य अस्तित्वं प्रतिपादयन्ति। "सः ईश्वरः सर्वज्ञः" इत्यादि वाक्यानि वेदेषु दृश्यन्ते। वेदाः प्रमाणरूपेण स्वीकृताः सन्ति, अतः तेषां वचनं प्रमाणम्।

**७. वाक्यात् (वाक्यव्यवस्था)-** वाक्यरचना बुद्धिमतां कार्यम् अस्ति। वेदवाक्यानि अत्यन्तं सुव्यवस्थितानि सन्ति। तेषां रचनायाः कर्ता कश्चित् बुद्धिमान् अस्ति। सः ईश्वरः अस्ति।

**८. संख्याविशेषात् (संख्या एवं व्यवस्था)**जगति यः गणितीयः, वैज्ञानिकः, संख्यात्मकः क्रमः दृश्यते, सः स्वतः न सम्भवति। ग्रहगतिः, ऋतुचक्रं, शरीररचना एतेषु सर्वत्र गणनात्मकसामञ्जस्यं दृश्यते। एषः क्रमः ईश्वरस्य बुद्धिमत्तां दर्शयति। उदयनाचार्यः केवलं स्वमतं न प्रतिपादयति, किन्तु अन्यदर्शनानां मतानां खण्डनम् अपि करोति।

**१. बौद्धमतस्य खण्डनम्-**

बौद्धाः क्षणिकवादं प्रतिपादयन्ति। उदयनाचार्यः वदति यत् यदि सर्वं क्षणिकं स्यात्, तर्हि स्थायित्वं कथं दृश्यते?

**२. सांख्यमतस्य खण्डनम्-**

सांख्याः प्रकृतिमेव कारणं मन्यन्ते। किन्तु अचेतना प्रकृतिः चेतनजगत् कथं सृजति? इति प्रश्नः।

**३. चार्वाकमतस्य खण्डनम्-**

चार्वाकाः केवलं प्रत्यक्षं प्रमाणं मन्यन्ते। उदयनाचार्यः अनुमानस्य महत्त्वं दर्शयति।

उदयनाचार्यस्य मते ईश्वरः सर्वज्ञः, सर्वशक्तिमान्, नित्यः, जगत्कर्ता, न्यायकारी विद्यते। सः न केवलं सृष्टेः कारणम्, अपि तु नैतिकव्यवस्थायाः आधारः अपि अस्ति।

उदयनाचार्यस्य तर्काः अद्यापि प्रासंगिकाः सन्ति। विज्ञानयुगे अपि ब्रह्माण्डस्य उत्पत्तिः, प्राकृतिकनियमाः, जीवसृष्टेः जटिलता एते सर्वे प्रश्नाः अद्यापि "कारणं किम्?" इति जिज्ञासां जनयन्ति। उदयनाचार्यस्य विचाराः एतस्य समाधानस्य मार्गं दर्शयन्ति। उदयनाचार्यः भारतीयदर्शनपरम्परायां एकः महान् तर्कशास्त्री आसीत्। तेन ईश्वरसिद्धिः केवलं श्रद्धायाः आधारः न, अपितु युक्त्या अपि समर्थिता इति प्रदर्शितम्। तस्य अष्टौ तर्काः कार्य, आयोजन, धृति, पद, प्रत्यय, श्रुति, वाक्य, संख्या एते सर्वे मिलित्वा ईश्वरस्य अस्तित्वं सुदृढतया स्थापयन्ति।जनाः कथयन्ति एकदा बौद्धैः सह शास्त्रार्थकाले ईश्वरसिद्धये उदयनाचार्यस्य समक्षे एकम् दुष्करं कार्यम् प्रदत्तवान् यत् तालवृक्षस्य उपरि स्थित्वा सः "ईश्वरः अस्ति " इत्युक्त्वा कूर्दतु। उदयनाचार्यः अपि तस्य समक्षे एतादृशं दुष्करं कार्यं प्रदत्तवान् यत् बौद्धः अपि तालवृक्षस्य उपरि स्थित्वा "ईश्वरः नास्ति" इति उक्त्वा कुर्दतु।अत्र यः सकुशलः स्वस्थो वा भविष्यति तर्हि तस्य वाक्यं प्रामाणिकं भविष्यति। अस्यां घटनायाम् उदयनाचार्यः कूर्दित्वा अपि सकुशलः आसीत्। परन्तु बौद्धस्य अस्थिभंगो जातः। इत्थम् ईश्वरसिद्धिविषयकं शास्त्रार्थं विजित्य उदयनाचार्यः श्रीजगन्नाथदर्शनाय जगन्नाथपुरीम् अगच्छत् तत्र मन्दिरस्य द्वारं पिहितम् दृष्ट्वा एकं श्लोकम् उक्तवान्-

**ऐश्वर्यमदमत्तोऽसि मामवज्ञाय वर्तसे।**
**उपस्थितेषु बौद्धेषु मदधीना तव स्थितिः॥**

श्लोकोच्चारणात् अनन्तरं मन्दिरस्य द्वारं स्वयमेव उद्घाटितम् अभवत्। अत्र वयं पश्यामो यत् आचार्य उदयनाचार्यस्य उपरि ईश्वरस्य महती कृपादृष्टिः आसीत्। अतः निष्कर्षतः वक्तुं शक्नुमो यत्- "युक्त्या सह श्रद्धा यत्र, तत्रैव सत्यस्य प्रकाशः भवति।" उदयनाचार्यस्य ईश्वरसिद्धिः अस्य सिद्धान्तस्य उत्कृष्टम् उदाहरणम् अस्ति।



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्तासंवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमो नन्दिनि। प्रथमं वृत्तं शृणु। एकेन विमानचालकेन विमानविलम्बस्य सत्यं कारणं प्रोक्तम्। तेन सर्वे यात्रिणः प्रसन्नाः भूत्वा करताडनं कृतवन्तः सन्ति।

**नन्दिनी-** सत्यभाषणं सर्वदा सुखदं भवति। अपरं वृत्तं तु कश्चन भारतीयमूलः पुरुषः द्राविडदेशे (तमिलनाडु) स्थितं स्वपितृणां पुरातनं ग्रामं प्रति पुनः गतः। तेन स्वपितरौ प्रति महती कृतज्ञता प्रकटीकृता।

**काव्या-** स्वमूलस्य स्मरणं प्रशंसनीयम्। अधुना स्वास्थ्यविषये- एकेन त्र्युत्तरशतवर्षीयवैद्येन दीर्घायुषे त्रयः सरलाः नियमाः श्राविताः सन्ति। सः अद्यापि स्वस्थः वर्तते।

**नन्दिनी-** उत्तमं जीवनं नियमानुपालनेन एव शक्यते। अन्तिमं वृत्तं विस्मयकरं वर्तते- केनडा-देशे कश्चन वृक्षकर्तकः एकस्यां घण्टायां नवचत्वारिंशत्-सहस्र-रूप्यकाणि अर्जितवान् अस्ति। एतत् ज्ञात्वा एकः भारतीयः पुरुषः अतीव विस्मितः जातः।

**काव्या-** परिश्रमेण किमपि असाध्यं नास्ति। धन्यवादः।

## डा. वर्षा टोणगांवकर
## पुणे/ महाराष्ट्रम्

एका वापी जलेन परिपूर्णं भवति तस्य प्रमुखं कारणम् अन्तस्थाः स्थिताः प्रवाहाः एव। यदि अन्तस्थाः प्रवाहाः विनष्टाः तर्हि वापी निरर्थकाः भविष्यति। तथैव यदि अस्माकं जीवने अपि प्रवाहाः प्रेम्णः, स्नेहस्य, ममताया भवति तर्हि अस्माकं जीवने अपि सम्बन्धिनाः कदापि न्युनं न भविष्यति। उत्तमेन हृदयेन वयं नैकाः आप्ताः योजयितुम् शक्नुमः। उत्तमेन स्वभावेन सम्बन्धिनाः आजन्म चिरस्थायी भविष्यति।

# १४ तमाय दलाईलामा-वर्याय दीर्घायु-प्रार्थना अर्पिता

हिमसंस्कृतवार्ता। तिब्बती-धर्मगुरुवे १४ तमाय दलाईलामा-वर्याय बुधवासरे मैक्लोडगञ्ज-स्थिते मुख्य- तिब्बती- मन्दिरे 'सैंट्रल दोखाम चुशी गंगड्रक' तथा 'हिमालयन बौद्ध सांस्कृतिक सङ्घ' इत्यनयोः पक्षतः पारम्परिकी दीर्घायु-प्रार्थना अर्पिता। एतद् धार्मिकानुष्ठानम् 'द्रोलकर त्से- जिन यिशिन खोरलो' विध्यनुसारं सम्पन्नम् अभवत्। प्रातः प्रायः ८:१५ वादने दलाईलामा-महोदयः स्वकीयावासात् मुख्यमन्दिरं प्राप्तवान्, यत्र विविधानां बौद्ध-परम्पराणां प्रतिनिधिभिः, वरिष्ठ-भिक्षुभिः, आयजकैश्च तस्य पारम्परिकं स्वागतं विहितम्।